सस्ताङ्गो भृशमतिसार्य्यते च यो वै
तं ब्रूयाच्छिशुमथ शीतपूतनार्त्तम् ॥
म्लानाङ्गः सरुधिरपाणिपादवक्त्रो
बह्वाशी कलुषशिराहतोदरो यः ।
स ज्ञेयः शिशुरथ रक्तमण्डिकार्त्तः
सोद्विग्नो भवति च मूत्रतुल्यगन्धिः ॥
यः फेनं वमति विनम्यते च मध्ये
सोद्विग्नो विहसति चोर्द्धमीक्षमाणः ।
कूजेच्च प्रततमथो वसास्रगन्धि-
र्निःसंज्ञो भवति स नैगमेयजुष्टः ॥”

अथ सामान्यग्रहजुष्टानां चिकित्सामाह ।
सहाशुक्तिकोटीचकाथस्नानं ग्रहापहम् ।
सहा माषपर्णी ।
“सप्तच्छदामयनिशाचन्दनैश्चानुलेपयेत् ।
सर्पत्वक् लशुनं मूर्व्वा सर्षपारिष्टपल्लवाः ॥
विड़ालविड़जालोममेषशृङ्गी वचा मधु ।
धूपः शिशोर्ज्वरघ्नोऽयमशेषग्रहनाशनः ॥
बालशान्तीष्टकर्म्माणि कार्य्याणि ग्रहशान्तये ।
वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ॥
सारिवा सैन्धवञ्चैव पिप्पली घृतमष्टमम् ।
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ॥
दृढ़स्मृतिः क्षिप्रमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ॥
न भवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥”
अष्टमङ्गलं घृतम् ॥

अथ विशिष्टग्रहजुष्टानां चिकित्सामाह ।
“सोमवल्लीमिन्द्रवृक्षं वन्दाकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥”

तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।
“स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
वातघ्नद्रुमपत्राणां क्वाथेन परिषेचनम् ॥
देवदारुणि रास्नायां मधुरेषु गणेषु च ।
सिद्धं सर्पिश्च सक्षीरं पातुमस्मै प्रदापयेत् ॥
सर्षपाः सर्पनिर्म्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवाञ्चापि रोमाण्युद्धूपनं भवेत् ॥”
काकादनी श्वेतगुञ्जा ।
सोमवल्लीमिन्द्रवृक्षं वन्दाकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥”
सोमवल्ली सोमलता । इन्द्रवृक्षं ककुभम् ।
मृगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताका
रक्तांश्च गन्धान् विविधांश्च भक्ष्यान् ।
घृतञ्च देवाय बलिं निवेद्य
सकुक्कुटं स्कन्दगृहे निधाय ॥
स्नानं त्रिरात्रं निशि चत्वरेषु
कुर्य्यात् परं शालियवैर्निवेद्य ।
गायत्रियुक्ताभिरपाङ्गिरग्निं
प्रज्वालयेदाहुतिभिश्च धीमान् ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अहन्यहनि कर्त्तव्या याभिरङ्गिरतन्द्रितैः ॥
तपसां तेजसाञ्चैव यशसां वयसां तथा ।
निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः ॥”

अथ स्कन्दापस्मारग्रहजुष्टस्य चिकित्सामाह ।
“बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥”
गोलोमी श्वेता दूर्व्वा । सुरसादिगणो यथा,—
“सुरसा श्वेतसुरसा पाठा फञ्जी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतवर्व्वरी ॥
कट्फलं खरपुष्पा च कासमर्द्दश्च शल्लकी ।
विड़ङ्गमथ निर्गुण्डी कर्णिकार उदुम्बरः ॥
बला च काकमाची च तथा च विषमुष्टिका ।
कफक्रिमिहरः ख्यातः सुरसादिरयं गणः ॥”
सुरसा कृष्णतुलसी । श्वेतसुरसा श्वेततुलसी । फञ्जी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कह्लारम् । भूस्तृणकः सुगन्धतृणम् । खरपुष्पा वर्व्वरी । कासमर्द्दः कसौंदी । विषमुष्टिका वकाइनि ॥ * ॥
“अष्टमूत्रविपक्वञ्च तैलमभ्यञ्जने हितम् ।”
मूत्राष्टकमाह ।
“गोजाविमहिषाश्वानां खरोष्ट्रकरिणान्तथा ।
मूत्राष्टकमिति ख्यातं सर्व्वशास्त्रेषु सम्मतम् ॥
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्तव्यं घृतं पश्चाद्दातव्यं पयसा सह ॥
काकोल्यादिगणेन कल्कीकृतेन तैलं पक्तव्यम् ।
काकोल्यादिगणो यथा,—
“काकोली क्षीरकाकोली जीवकर्षभकस्तथा ।
ऋद्धिर्वृद्धिस्तथा मेदा महामेदा गुडूचिका ॥
मुद्गपर्णी माषपर्णी पद्मकं वंशरोचना ।
शृङ्गी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका ।
द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ।
स्तन्यकृद्वृंहणो वृष्यः पित्तरक्तानिलापहः ।
उत्सादनं वचा हिङ्गुयुक्तमत्र प्रकीर्त्तितम् ॥
गृध्रोलूकपुरीषाणि केशा हस्तिनखो घृतम् ।
वृषभस्य च रोमाणि योज्यान्युद्धूपने सदा ॥
अनन्तां कुक्कुटीं विम्बीं मर्कटीञ्चापि धारयेत् ॥”
अनन्ता यवासा इति लोके । कुक्कुटी शाल्मली ।
“पक्वान्यामानि मांसानि प्रसन्नं रुधिरं पयः ।
सुभ्रोदनं निवेद्याथ स्कन्दापस्मारिणे वटे ॥”
वटे वटतले बलिं निवेद्येत्यन्वयः ।
तेन स्कन्दापस्मारिणा स्नानं कारयेदित्यन्वयः ।
“चतुष्पथे कारयेच्च स्नानं तेन ततः पठेत् ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।
विशाखः स शिशोरस्य शिवायास्तु शुभाननः ॥”

अथ शकुनीग्रहजुष्टस्य चिकित्सामाह ।
“शकुनीग्रहजुष्टस्य कार्य्यं वैद्येन जानता ।
वेतसाम्रकपित्थानां क्वाथेन परिषेचनम् ॥
ह्रीवेरमधुकोशीरसारिवोत्पलपद्मकैः ।
लोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम् ॥”
प्रदिहेत् लिम्पेत् । रूपसिद्धिरार्षत्वात् ।
“स्कन्दग्रहोक्ता धूपाश्च हिता अत्र भवन्ति हि ।
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ॥
शतावरीं मृगेर्व्वारुनागदन्तीनिदिग्धिकाः ।
लक्ष्मणां सहदेवाञ्च वृहतीञ्चापि धारयेत् ॥”
मृगेर्व्वारुः बड़ी इन्द्रवारुणी । नागदन्ती नागफुली इति लोके प्रसिद्धा ।
“तिलतण्डुलकं माल्यं हरितालं मनःशिलाम् ।
बलिरेष निकुम्भेषु निवेद्यो नियतात्मना ॥
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतशिरीषगन्धाह्वकुष्ठगुग्गुलुसर्षपैः ॥
सिद्धमभ्यञ्जने तैलं धारणं पूर्व्वमेव तु ।
शकुनीग्रहशान्त्यर्थं प्रदेहं कारयेद्धितम् ॥
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ।
निकुम्भोक्तेन विधिना स्नपयेत्तं ततः पठेत् ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु ॥
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु ॥” * ॥

अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।
“अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी चैतासां क्वाथेन परिषेचनम् ॥
अजशृङ्गी मेढ़ाशृङ्गी । सहा सेवतीपुष्पजातिः ।
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्जरसे तथा ।
पलङ्कषायां नलदे तथा गौरकदम्बके ॥
सर्जरसः रालः पलङ्कषा गुग्गुलुः । नलदं लामज्जकसुशीरवत्पीतच्छविः । गौरकदम्बकः हारिद्रकः । हरदुया कदम्ब इति लोके ।
धवाश्वकर्णककुभशल्लकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः ॥
अश्वकर्णः शाखु इति लोके प्रसिद्धः ।
कुलत्थाः शङ्खचूर्णञ्च प्रदेहः साम्रगन्धिकः ।
गृध्रोलूकपुरीषाणि यवान् यवफले घृतम् ॥
सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः ॥
यवफलो वंशाङ्कुरः ।
शुक्लाः सुमनसो लाजाः पयःशाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥
गोतीर्थे गोष्ठे ।
स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ।
उपासते यां सततं देव्यो विविधभूषणाः ॥
लम्बा करालाविनता तथैव बहुपुत्रिका ।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु ॥ * ॥

अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।
कपोतवङ्का श्योनाको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्व्वालानां परिषेचने ॥
कपोतवङ्का ब्राह्मी इति लोके । पारिभद्रो निम्बः । आस्फोता अपराजिता ।
नवा पयस्या गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्जरसश्चैव तैलार्थं कल्क इष्यते ॥